M. T. B. COLLEGE, SURAT

*Manuscripts Library*

No. Ref.
Ser. 895

Title: Siddhivinayaka
Puja

895

C

| | | | |
|---|---|---|---|
| | : | : Siddhivinayaka Puja | : **Title** |
| | : | : | : Author |
| | : | : | : Editor |
| | : | : S'aka. 1717 | : Year, Vols. |
| Sk | : | : | : Publisher |
| 895 | : | : Fol. 6 | : Remarks |

श्रीगणेशायनमः॰ आचम्यप्राणानायम्यदेशकालौस्मृत्वाममपुत्रपौत्रादिध
नधान्यादिसिद्धिद्वाराभीष्टकामनासिध्यर्थंश्रीसिद्धिविनायकपूजनंयथासं
पादितोपचारैःकरिष्ये॰ तदंगगणपतिपूर्वकंन्यासादिकरिष्ये॰ पृथिव्यामेरु॰ ए
ष्वोत्ति॰ ऊर्ध्वं॰ अपसर्पंतु॰ तीक्ष्णदंष्ट्र॰ गजवदनायनमः॰ अंगुष्ठाभ्यां॰ भचिं
त्यायतर्जनी॰ तीक्ष्णदंष्ट्रायमध्यमा॰ त्रिनेत्रायअनामिकाभ्यां॰ बृहदुदरायक
निष्ठिका॰ अशेषायकरतल॰ भूतिराजायहृदया॰ पुराणायशिरसे॰ अमरवर
रूपूज्यायशिखायै॰ रक्तवर्णायकवचा॰ सुरेशायनेत्रत्रया॰ पशुपतिसुतायअ
स्त्राय॰ विघ्नराजायदिग्बंधः॰ ततः कलशपूजनं॰ घंटावादनं ततःप्राणप्रतिष्ठा॰
ततःमंटपपूजनं उत्तप्तोज्वलकांचनेनरचितंतुंगांहिरंगस्थलंशुद्धस्फटिकमु
क्तिकाविलसितैस्तंभैश्चहेमैःशुभैः॥ द्वारैश्चामररत्नराजिरचितैःशोभितवहेमंड
पेस्तत्रान्यैरपिचित्रशंखधवलेप्राजितंरत्नसिक्ते॥ १॥ मुक्ताजालविलंबितं १

25

उपयुतेर्वज्रैश्चसोपानकेनानारत्नविलंबितैश्चकलशैरत्यंतशोभावहे॥ माणि
क्योज्वलदीप्तदीप्तिचिलसल्लक्ष्मीविलासास्पदंध्यायेन्मंडपमर्चनेषुसकलेष्वेवं
विधिंसाधुभिः॥ २ अथद्वार॰ पूर्वद्वारे श्रियेनमः॰ धात्रे॰ विधात्रे॰ दक्षिणद्वारे॰
श्रियै॰ चंडाय॰ प्रचंडाय॰ पश्चिमद्वारे॰ श्रियै॰ शंखनिधये॰ पद्मनिधये॰ उत्तरद्वा
रे श्रियै॰ गंगायै॰ यमुनायै॰ मध्येसिद्धिविनायकायसांगायसपरिवारायसायुधा
यसशक्तिकायसावरणदेवतायनमः॰ आवाहयामिस्थापयामिपूजयामिनमः॰
अथध्यानं॰ गजवदनमचिंत्यंतीक्ष्णदंष्ट्रं॰ एकदंतंशूर्पकर्णंगजवक्त्रंचतुर्भुजं॰ पाशां
कुशधरंदेवंध्यायेत्सिद्धिविनायकं॰ चतुर्भुजंत्रिनेत्रंचसर्वाभरणभूषितं॰ पाश
माद्यकरेबिभ्रद्दक्षिणेचाक्षसूत्रकं॰ तृतीयेमोदकंचैवचतुर्थेपरशुंतथा॰ सिद्धि
विनायकंध्यायामि॰ आगच्छगजदाधारसुरासुरसुपूजित॰ अनाथनाथसर्व
ज्ञलोकेशगणनायक॰ १ गणाध्यक्षमावाहमि॰ मौक्तिकैः पुष्परागैश्चनानार

सिधि॰ रत्नविभूषितं॰ रत्नसिंहासनंतुभ्यमुमासुतनमोस्तुते॰ उमासुतायनमः आस
२ नं॰ गंडकीनर्मदानांचआनीतमुदकंशुभं॰ गौरीसुतायपाद्यंतेगृहाणकुसुमैः
सह॰ गौरीसुतायनमः पाद्यं॰ आचमनीयं॰ हिरण्यगंधपूर्णैश्चकुसुमैःसंयुतंज
लं॰ मयानीतंगणाध्यक्षगृहाणार्घ्यंनमोस्तुते॰ गणाध्यक्षायनमः अर्घ्यं॰ एला
कर्पूरसहितंवासितंजलमीदृशं॰ आचम्यतांमयादत्तंनमस्तेगिरिजासुत॰ गिरि
जासुतायनमः आचमनीयं॰ ततोमलापकर्षस्नानं॰ क्षीरंदधिघृतंचैवमधुशर्क
रयायुतं॰ कुरुपंचामृतैःस्नानंउमासुतनमोस्तुते॰ मामलसमुद्भवायनमः पं
चामृतस्नानं॰ भागीरथीनर्मदाचगंडकीगौतमीतथा॰ ताभ्यश्चानीतमुदकंस्ना
नार्थंतेगजानन॰ गजाननायनमः स्नानं॰ पार्वतीसुतायनमः आचमनीयं॰ र
क्तवस्त्रयुगंदेवदेवानामपिदुर्लभं॰ सर्वप्रदंगृहाणेदंलोकानामिष्टदायक॰ देवा
यनमः वस्त्रं॰ पुनः आचमनीयं॰ ब्रह्मसूत्रंकांचनंचरक्तमौक्तिकसंयुतं॰ सर्पे
राध्यंमहद्दिव्यंगृहाणगिरिजासुत॰ गिरिजासुतायनमः उपवीतं॰ कर्पूरागुरु

२५

संयुक्तंदिव्यचंदनमुत्तमं॰ विलेपनंगणाध्यक्षगृहाणइभवक्त्रक॰ इभवक्त्रका
यनमः गंधं॰ अक्षताश्चसुरश्रेष्ठाः शालितंडुलसंयुताः॰ रक्तचंदनसंमिश्राः
गृहाणचतुरानन॰ चतुराननायनमः अक्षता॰ केयूरैर्नूपुराद्यैश्चरत्नमौक्ति
कसंयुतैः॰ भूषणैर्भूषयामित्वांनमोमूषकवाहन॰ मूषकवाहनायनमः आ
भरणादिसमं॰ कस्तूरीगंधचूर्णंचकुंकुमंसिंदुरंतथा॰ भक्त्यानीतंमयादत्तंगृ
हाणसुरसत्तम॰ सुरसत्तमायनमः परिमलद्रव्याणि॰ माल्यादीनि॰ करवीरे॰
सुगंधीनिसुपुष्पाणिगृहाणत्वंगजानन॰ विनायकनमस्तेस्तुसुरासुरसु
पूजित॰ विनायकायनमः पुष्पाणिस॰ अथांगपूजा॰ गणाधिपायनमः पा
दौपूजयामि॰ विघ्नराजाय॰ जानुनी॰ आखुवाहनाय॰ ऊरूद्वयं॰ हेरंबाय॰ क
टिं॰ लंबोदराय॰ उदरं॰ गणनाथाय॰ हृदयं॰ स्थूलकंठायकंठं॰ स्कंदाग्रजाय॰
स्कंधौपू॰ पाशहस्ताय॰ हस्तौपू॰ गजवक्त्रायवक्त्रं॰ विघ्नहर्त्रेनमः नेत्रौ॰ त्रिने
त्रायतृतीयनेत्रं॰ लोकनाथाय॰ ललाटं॰ सर्वेश्वराय शिरः पूजयामि॰ सिसि

सिद्धि॰ विनायकाय॰ शिखायां॰ सत्यव्रताय॰ सर्वांगंपूजयामि॰ १६ अथावरणपूजा॰
३ गणेशा॰ उमापुत्रा॰ अघनाशिने॰ ३ हेरंबाय॰ ४ गजवक्त्राय॰ ५ स्कमुखाय॰ ६ ए
कदंताय ७ कपिलाय ८ विकटाय॰ ९ विघ्ननाशिने॰ १० भालचंद्राय॰ ११ गणाध्य
क्षाय॰ १२ धूम्रकेतवे॰ १३ ईशपुत्राय॰ १४ इभवक्त्राय॰ १५ कुमारगुरवे॰ १६
सिद्धिविनायकाय॰ इतिप्रथमावरणं॰ वीरगणपतये॰ १ शूरगणपतये॰ २ वर
गणपतये॰ ३ विनायकाय॰ ४ इभास्याय॰ ५ एकदंताय॰ ६ लंबोदराय॰ ७ क्षि
प्रप्रदनाय॰ ८ इतिद्वितीयावरणं॥ अथपत्रपूजा॰ स्कमुखाय॰ पाचीपत्रं॰ गणाधि
पायभृंगराजपत्रं॰ २ उमापुत्राय बिल्वपत्रं॰ ३ लंबोदरायबदरीपत्रं॰ ४ गजान
नायदूर्वापत्रं॰ हरसूनवेधुत्तूरप॰ गजकर्णायतुलसीपत्रं॰ गुहाग्रजाय अपामा
र्गपत्रं॰ एकदंतायबृहतीप॰ इभास्यायशमीप॰ विकटायकरवीरप॰ विनायका
यअशोकप॰ कपिलायअर्कप॰ भिन्नदंतायअर्जुनप॰ शक्तिकायविष्णुक्रांता॰
वटवे॰ दाडिमीप॰ शूर्पकर्णाय॰ देवदारुप॰ भालचंद्रायचूतप॰ हेरंबायसिं
दूरप॰ शूर्पकर्णायजातीप॰ शूराय॰ वटपत्रं॰ इतिएकविंशतिपत्रपूजा॥ ॥ ३

२५

अथएकविंशतिपुष्प॰ गणाधिपायकेतकीपुष्पं॰ इभवक्त्रायचंपकपु॰ लंबोदरा
यपूगपुष्पं॰ बटवेगोविंदपु॰ सिद्धिविनायकाय॰ जातीपु॰ नागयज्ञोपवीतिनेक
रवीरपु॰ गजकर्णायधुत्तूरपु॰ भक्तप्रियायशालपु॰ पार्वतीपुत्राय॰ पारिजातपु॰
विघ्नराजायबकुलपु॰ कुमारगुरवेविष्णुक्रांतापु॰ अघनाशनायमल्लिकापु॰ स
का शक्तिकायकर्णिपु॰ भालचंद्रायपद्मपु॰ रुद्रप्रियायरक्तोत्पलपु॰ विनायकाइंदी
वरपु॰ मूषकवाहनायतुलसीपु॰ अव्यक्तायपुन्नागपु॰ हरसूनवेमालतीपु॰ स्कं
दाग्रजायअशोकपु॰ त्रिनेत्रायदेवदारुपु॰ इतिएकविंशतिपुष्पाणि॥ अथना
माष्टोत्तरशतं॰ गणेश्वराय॰ विघ्नराजाय॰ गौरीपुत्राय॰ विनायकाय॰ स्कंदाग्रजाय॰
अव्यक्ताय॰ पूताय॰ दक्षाय॰ अध्यक्षाय॰ द्विजप्रियाय॰ अग्निगर्वच्छिदे॰ इंद्रश्रीप्र
दाय॰ वाणीबलप्रदाय॰ सर्वसिद्धिप्रदायकाय॰ सर्वतनयाय॰ शार्वरीपतये॰ सर्वा
त्मकाय॰ सृष्टिकर्त्रे॰ देवानीकार्चिताय॰ शिवाय॰ शुद्धाय॰ बुद्धिप्रदाय॰ शांताय॰
ब्रह्मचारिणे॰ गजाननाय॰ द्वैमातुराय॰ मुनिस्तुत्याय॰ भक्तविघ्नविनाशनाय॰

सिद्धि एकदंताय·चतुर्बाहवे·चतुराय·शक्तिसंयुताय·लंबोदराय·शूर्पकर्णाय·हेरंबा
४ य·ब्रह्मविद्धमाय·कालाय·ग्रहपतये·कामिने·सोमसूर्याग्निलोचनाय·पाशां
कुशधराय·चंडाय·गुणातीताय·निरंजनाय·अकल्मषाय·स्वयंसिद्धाय·सिद्धा
र्चितपदांबुजाय·बीजापूरकराय·अव्यक्ताय·वरदाय·शाश्वताय·कृतिने·विद्व
प्रियाय·वीतरागाय·गदिने·चक्रिणे·इक्षुचापधृते·अब्जोत्पलकराय·श्रीदा
य·श्रीपतिस्तुतिहर्षिताय·कुलाद्रिभेत्त्रे·जटिलाय·चंद्रचूडाय·अमरेश्वराय·
नागयज्ञोपवीतिने·श्रीकंठाय·अर्चिताय·रामार्चिताय·व्रतिने·स्थूलकंठाय·
त्रयीकर्त्रे·सर्वघोषपराय·प्रियाय·स्थूलतुंडाय·अग्रण्याय·विमते·ग्रामणिने·
गणपाय·स्थिराय·बुद्धिदाय·सुभगाय·शूराय·वागीशाय·सिद्धिदाय·दूर्वाबि
ल्वप्रियाय·शांताय·पापहारिणे·समाहिताय·आश्रितश्रीपदाय·सौम्याय·भ
कां क्तेप्सितप्रियाय·अच्युताय·केशवाय·केवलाय·सिद्धाय·सच्चिदानंदविग्रहाय·
ज्ञानिने·मायायुताय·दांताय·ब्रह्मिष्ठाय·भक्तवर्जितप्रमत्तदैत्यभयाय·व्यक्त

श्री

मूर्तये·अमूर्तिमते·पार्वतीशंकरोत्संगखेलनोत्सवलालसाय·समस्तजग
दाधराय·वरमूषकवाहनाय·हृष्टचित्तसर्वात्मने·सर्वसिद्धिप्रदायकायनमः·
इत्यष्टोत्तरशतनामपूजा·एकविंशतिनामानि·गणनाथाय·गणपतये·हेरंबाय·
धरणीधराय·महागणपतये·यक्षेश्वराय·क्षिप्रप्रसादाय·अमोघसिद्धये·अ
मृताय·नित्याय·चिंतामणये·निधये·सुमंगलाय·बीजापूराय·वरदाय·कश्य
पनंदनाय·वाचस्पतये·सिद्धाय·ढुंढिराजाय·मोदकहस्ताय·श्रीसिद्धिविनाय
काय·सुमुखाय·एकदंताय·कपिलाय·गजकर्णाय·लंबोदराय·विकटाय·वि
घ्ननाशाय·गणाधिपाय·धूम्रकेतवे·गणाध्यक्षाय·भालचंद्राय·गजाननाय·नमः
इतिद्वादशनामानि।दशांगंगुग्गुलंधूपंसुगंधंचमनोहरं·ग्रहाणविघ्नराजेंद्रश्री
त्वयंप्रतिगृह्यतां·विघ्नराजाय·धूपमाघ्रापयामि·सर्वगःसर्वलोकेशस्त्रैलोक्य
तिमिरापह·ग्रहाणमंगलंदीपंरुद्रप्रियनमोस्तुते·रुद्रप्रियाय·दीपंदर्शयामि·
नैवेद्यंगृह्यतांदेवलड्डुकान्नमक्ष्यसंयुतान्·घृतपायससंयुक्तंनैवेद्यंप्रतिगृह्य

सिद्धि॰ तां॰ श्रीसिद्धिविनायकायनमः नैवेद्यंस॰ नैवेद्यमध्येपानीयंस॰ उत्तरापोश
नंस॰ हस्तप्रक्षालनंस॰ मुखप्रक्षालनंस॰ शुद्धाचमनीयंसमनीयंस॰ करोद्
५ र्तनार्थेगंधंस॰ तांबूलमुत्तमंदेवशकलकर्पूरसंयुतं॰ पंचपूगफलैर्युक्तंगृहाणग
णनायक॰ गणनायकायनमः तांबूलंस॰ नारिकेलफलंद्राक्षंकदलीपूगमेवच॰ दा
डिंबिमातुलिंगंचफलानिप्रतिगृह्यतां॰ श्रीसिद्धिविनायकायनमः फलानिस॰
अथदूर्वांकुरपूजा गणाधिपायनमः दूर्वायुग्मंसमर्पयामि॰ एतानिदशनामम
त्रैः दूर्वायुग्ममिति॰ उमापुत्रायनमः दूर्वायुग्मं॰ अघनाशनायनमः दूर्वा॰ एक
दंतायनमः दूर्वा॰ इभवक्त्रायनमः दूर्वा॰ मूषकवाहनाय॰ दूर्वा॰ विनायकाय॰
दूर्वा॰ ईशपुत्राय॰ दूर्वा॰ सर्वसिद्धिप्रदायकाय॰ दूर्वा॰ कुमारगुरवे॰ दूर्वा॰ सर्वसं
कष्टनाशनाय॰ दूर्वांकुरंसमर्पयामि॰ गणाधिपनमस्तेस्तुउमापुत्राघनाशन॰
एकदंतेभवक्त्रेतितथामूषकवाहन॰ विनायकेशपुत्रेतिसर्वसिद्धिप्रदायक॰ कुमा
रगुरवेतुभ्यंपूजनीयाःप्रयत्नतः॰ २ नीराजनंगृहाणेदंदीपमालाभिरावृतं॰ स्व

र्णपात्रनिहितंदिव्यंविश्वप्रकाशितं॰ विनायकायनमः नीराजनंस॰ भक्तानांमुक्ति
दोदेवसर्वविघ्नविनाशक॰ सर्वसिद्धिप्रदोनॄणांभक्त्याकुर्यात्प्रदक्षिणां॰ सर्वसि
द्धिप्रदायनमः प्रदक्षिणां॰ सर्वदेवासुरैः पूज्यसर्वलोकेकनायक॰ सर्वजीवदया
युक्तनमस्कार्यंगणाधिप॰ यंब्रह्मवेदांतविदोवदंतिपरंप्रधानंपुरुषंतथान्ये॰ विश्वो
द्गतेःकारणमीश्वरंवातस्मैनमोविघ्नविनाशनाय॰ १ गणाधिपाय॰ नमस्कारा॰
छत्रंस॰ चामरंस॰ गीतंस॰ नृत्यंस॰ वाद्यंस॰ सर्वराजोपचारान्समः॰ पूर्वाचरितए
वंगुण॰ पूजासंपूर्णफलप्राप्त्यर्थंअर्घ्यप्रदानंकरिष्ये॰ नमस्तेदेवदेवेशनमस्तेविघ्न
नाशन॰ भक्तानुग्रहकोदेवगृहाणार्घ्यंनमोस्तुते॰ १ हिरण्यगंधतांबूलंसफलंजल
संयुतं॰ गृहाणार्घ्यंमयादत्तंलंबोदरनमोस्तुते॰ २ संसारदुःखनंत्राहिदासोहंतव
मेप्रभो॰ गृहाणार्घ्यंमयादत्तमुमासुतनमोस्तुते॰ ३ शुक्लपक्षेचतुर्थ्यांहिसंपूज्य
चविधूदये॰ भाद्रेमासिमयादत्तंगृहाणार्घ्यंगजानन॰ क्षीरोदार्णवसंभूतलक्ष्मी
बंधोनिशाकर॰ गृहाणार्घ्यंमयादत्तंरोहिणीसहितःशशिन्॰ रोहिणीसहितचंद्रा

४९५

सिद्धि॰ ६

यइदमर्घ्यंसमर्पयामि॰ न्यूनंवाप्यतिरिक्तंवायन्मयामोहतःकृतं॰ तथात्वंदेव
देवेशक्षंतुमर्हसितत्कृतं॰ पुत्रान्देहिधनंदेहिराज्यंलक्ष्मींचदेहिमे॰ शत्रूणांनाश
नंचैवकीर्तिस्याद्वदिगंतरं॰ सर्वदाविजयःप्राप्तिःसुखमायुर्निरोगता॰ जन्मजन्
मनितस्वामिन्नूतवाभक्तिश्चनिश्चला। देहिदेहिगणाध्यक्षभक्तानांवरदोभव॰
इतिप्रार्थनांब्राह्मणान्पूजयेत्तुभक्त्यागंधपुष्पादिवाणकैः॰ मोदकान्वक्ष्यमाणे
नदशादद्यात्समाहितः॰ ततःब्राह्मणपूजनं॰ वाणकदानमंत्रः॰ गणेशःप्रतिगृ
ह्णातुगणेशोवैददातिच॰ गणेशस्तारकोभाभ्यांगणेशायनमोनमः॰ इतिदानमंत्रः
विनायकस्यप्रतिमांवस्त्रयुग्मेनवेष्टितां॰ तुभ्यंसंप्रददेविप्रप्रीयतांमेगजाननः
इतिप्रतिमादानमंत्रः॰ विनायकनमस्तुभ्यंसततंमोदकप्रिय॰ निर्विघ्नंकुरुमेदे
वसर्वकार्येषुसर्वदा॰ यस्यस्मृत्या॰ मंत्रहीनं॰ यथाज्ञानतःकृतेनयथामीलितोपचा
रैःपूजनेनभगवान्श्रीसिद्धिविनायकःप्रीयतां॥ ॥शके१७१७राक्षसंश्रा
वणासितप्रतिपद्यांसौरदिनेइदंपुस्तकंलिखितंसमाप्तिमगमत्॥ श्रीः॥